संसर्गयोग्यत्वविरहाच्च सविकल्पकज्ञानवेद्यानां हि वचनप्रयोगयोग्यता न तु रसस्येति" सा०द० । कथने च "तदभावाभिलापाच्च" शा०सू० ।

**अभिलाव** पु० अभि+लू–घञ् । छेदने ।

**अभिलाष(स)** पु० अभि+लष(स)-घञ् । १इच्छायां, २लोभे च । अभेरिच्छाद्योतकत्वात् तदुपसृष्टलसेरिच्छार्थत्वम् । "अतोऽभिलाषे प्रथमं तथाविधे" इति रघुः मानुषामनुजव्याघ्र ! साभिलाषाः सुतान् प्रति" देवीमा० । "न खलु सत्यमेव शकुन्तलायां ममाभिलाषः" शकु० ।

**अभिलाषक** त्रि० अभि+लष–ण्वुल् । १ अभिलाषयुक्ते ।

**अभिलाषिन्** त्रि० अभि+लष–णिनि स्त्रियां ङीप् । अभिलाषशीले "जलाभिलाषी जलमाददानाम्" "अगच्छदंशेन गुणाभिलाषिणी" इति च रघुः "असंशयं क्षत्रपरिग्रहक्षमा यदार्य्यमस्यामभिलाषि मे मनः" शकु० ।

**अभिलाषुक** त्रि० अभि+लष–उकञ् । अभिलाषशीले, "जयमत्र भवान्नूनमरातिष्वभिलाषुकः" किरा० ।

**अभिवदन** म० अभिरानुकूल्ये अनुकूलं वदनं कथनम् । १आनुकूल्यार्थकथने अभिवादने । वदनस्य मुखस्याभिमुख्यम् अव्ययी० । २मुखस्याभिमुख्ये अव्य० ।

**अभिवन्दन** न० अभितः सर्वतोऽभिमुखे वा वन्दनम् । १सर्वतोनतिकरणे २ अभिमुखप्रणामे च । "उभयोरेव शिरसा चक्रे पादाभिवन्दनम्" रामा० ।

**अभिवयस्** त्रि० अभिमतं श्रेष्ठं वयोऽस्य प्रा०ब० । प्रकृष्टवयस्के "तीव्रस्याभिवयसो अस्य पाहि" ऋ०१०,१६०,१ ।

**अभिवर्त्तिन्** त्रि० आभिमुख्येन वर्त्तते अभि+वृत–णिनि स्त्रियां ङीप् । १ अभिमुखे वर्त्तमाने "कल्पन्तां च रणार्थाय मृत्युकालाभिवर्त्तिनः" रामा० ।

**अभिवर्षक** त्रि० अभितोवर्षकः । १ सर्वतोवर्षणकर्त्तरि ।

**अभिवर्षण** न० अभितोवर्षणम् । सर्वतोवर्षणे ।[सर्वतोवर्षके ।

**अभिवर्षिन्** अभितोवर्षति अभि+वृष–णिनि स्त्रियां ङीप् ।

**अभिवात्** त्रि० आभिमुख्येन वाति गच्छति वा–शतृ स्त्रियां ङीप् । १अनुचरे, २"अभिवानभिभूत्यै रूपम्" शत०ब्रा० ।

**अभिवाद** पु० अभि+चु०वद–भावे अच् । १अभितः प्रणामे "प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते" इति "नामधेयस्य ये केचिदभिवादं न जानते" इति च मनुः

**अभिवादक** त्रि० अभि+चु०वद–ण्वुल् । १ आभिमुख्येन नतिकारके । "आयुष्मान् भव सौम्येति वाच्योविप्रोऽभिवादकः (ने) मनुः ।

**अभिवादन** न० अभिमुखीकरणाय वादनं वदनम् चु०–वद–ल्युट्, अभिमुखं वाद्यते आशीरनेन वद–णिच्–ल्युट् वा । १नामग्रहणपूर्व्वकनतौ २पादग्रहणेन वाचा वा नतौ । तत् प्रकारो यथा "ऊर्द्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति । प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥ अभिवादनशीलस्य नित्यं वृद्धोपसेविनः । चत्वारि संप्रवर्द्धन्ते आयुर्विद्या यशो बलम् ॥ अभिवादात् परं विप्रो ज्यायांसमभिवादयन् । असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत् ॥ नामधेयस्य ये केचिदभिवादं न जानते । तान् प्राज्ञोऽहमिति ब्रूयात् स्त्रियः सर्वास्तथैव च ॥ भोःशब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने । नाम्नां स्वरूपभावोहि भोभाव ऋषिभिः स्मृतः ॥ आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादकः (ने) । अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्व्वाक्षरप्लुतः ॥ यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् । नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥ ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् । वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥ अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् । भोभवत्पूर्व्वकं त्वेनमभिभाषेत धर्मवित् ॥ परपत्नी तु या स्त्री स्यादसम्बन्धा च योनितः । तां ब्रूयाद्भवतीत्येवं सुभगे ! भगिनीति च ॥ मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् । असावहमिति ब्रूयात् प्रत्युत्थाय यवीयसः ॥ मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा । संपूज्या गुरुपत्नीवत् समास्ता गुरुभार्य्यया ॥ भ्रातुर्भार्य्योपसंग्राह्या सवर्णाहन्यहन्यपि । विप्रोष्य तूपसंग्राह्या ज्ञातिसम्बन्धियोषितः ॥ पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्य्यपि मातृवद्वृत्तिमातिष्ठेत् माता ताभ्यां गरीयसी ॥ दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृताम् । त्र्यब्दपूर्व्वं श्रोत्रियाणां स्वल्पेनापि स्वयोनिषु ॥ ब्राह्मणं दशवर्षन्तु शतवर्षन्तु भूमिपम् । पितापुत्त्रौ विजानीयाद्ब्राह्मणस्तु तयोः पिता ॥ वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी । एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥ पञ्चानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च । यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः ॥ चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः । स्नातकस्य च राज्ञश्च पन्था देयो वरस्य च ॥ तेषान्तु समवेतानां मान्यौ स्नातकपार्थिवौ । राजस्नातकयोश्चैव स्नातको नृपमानभाक्" इति मनुः "राजर्त्विक्श्रोत्रियाधर्मप्रतिषेध्युपाध्यायपितृव्यमातामहमातुलश्वशुरज्येष्ठभ्रातृसम्बन्धिनश्चाचार्य्यवत् । पत्न्य